२३

तनादितः चुरादिपर्यन्तम्-
तन् कृ क्री चुर् धातवः

प्रस्तावना

भवन्तः इतः पूर्वस्मिन् पाठे स्वादिगणः, तुदादिगणः, रुधादिगणः च इति गणत्रयस्य परिचयं प्राप्तवन्तः। अधुना तनादिगणः, क्र्यादिगणः, चुरादिगणः चेति अन्तिमं गणत्रयं ज्ञास्यति। अत्रापि प्रतिगणं विकरणभेदः अस्ति, विकरणभेदात् च रूपभेदो भवति। यथा तनादिगणीयधातुभ्यः उप्रत्ययः, क्र्यादिगणीयधातुभ्यः श्नाप्रत्ययः। विकरणभेदात् रूपभेदः, तद्यथा तन्-धातोः उप्रत्यये तनोति इति रूपं, क्री-धातोः श्नाप्रत्यये क्रीणाति इति रूपम्। चुरादिगणस्तु सर्वेभ्यो विलक्षणः। अन्येषु गणेषु भवन्तः दृष्टवन्तः यत् धातुप्रत्यययोः मध्ये शबादिविकरणाः भवन्ति। चुरादिगणीयप्रकरणे तु न मूलधातोः कोऽपि विकरणो भवति। धातोः परे स्वार्थे णिच्प्रत्यये कृते ण्यन्तस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञायां ततः तिबादिप्रत्ययो भवति, अनन्तरम् शप्-विकरणः भवति इति चुरादिगणीयधातोः वैशिष्ट्यम्। अत्र पाठे न सर्वाणि रूपाणि ससूत्रं प्रदर्शयिष्यन्ते। अस्मिन् पाठे तनादिगणीयस्य तन्धातोः कृधातोः च आलोचनं विधास्यते। ततः क्र्यादिगणीयस्य क्रीधातोः, चुरादिगणीयस्य चुर्-धातोः च आलोचना भविष्यति। धात्वन्तरस्य प्रक्रियाः स्वयं साधनीयाः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- प्रतिगणं कीदृशं विकरणं भवति तज्ज्ञास्यति।
- विकरणविधायकसूत्रार्थं ज्ञास्यति।
- तत्र तत्र व्याख्यातानाम् विशेषसूत्राणाम् परिचयम् लप्स्यते।
- तन्धातोः कृधातोश्च रूपाणि साधयितुं शक्नुयात्।
- क्री-धातुरूपाणि साधयितुं पारयेत्।
- चुर्-धातुरूपाणि साधयितुम् अर्हेत्।
- चुरादिगणीयधातोः वैशिष्ट्यम् ज्ञास्यति।
- एतज्ज्ञात्वा च अन्यानि अपि धातुरूपाणि साधयितुं प्रभवेत्।

➢ तत्र तत्र प्रदर्शितानि वैकल्पिकरूपाणि अपि ज्ञास्यति।

अथ तनादिगणः

तनुँ विस्तारे इति स्वरितेतः उभयपदिनः सेटः तनादिगणीयात् धातोः कर्तरि **लटि** प्रथमैकवचनविवक्षायां परस्मैपदसंज्ञके तिपि तन् ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२३.१] तनादिकृञ्भ्य उः॥ (३.१.७९)

सूत्रार्थः - तनादिधातुभ्यः उ-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तनादिकृञ्भ्यः (५/३), उः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः उः प्रत्ययः परः इति। तनादिगणः दशसु धातुगणेषु अष्टमः। तन् आदिः येषाम् (धातूनाम्) ते तनादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः तनादिभ्यः। तनादयश्च कृञ् च तेषाम् इतरेतरयोगद्वन्द्वः, तनादिकृञः, तेभ्यः तनादिकृञ्भ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः तनादिगणपठितधातुभ्यः कृधातोश्च उप्रत्ययः परो भवति इति। सूत्रेणानेन उप्रत्ययो विधीयते। उ इति विकरणस्य शित्वाभावात् न सार्वधातुकसंज्ञा। किन्तु आर्धधातुकं शेषः इति आर्धधातुकसंज्ञा।

उदाहरणम् - पूर्वोक्तप्रकारेण तन् ति इति जाते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण उप्रत्ययो भवति यतो हि तिप् सार्वधातुकप्रत्ययः तन्धातोः परः अस्ति। ततः तन् उ ति इति जाते तिप् सार्वधातुकप्रत्ययोऽस्ति इति कृत्वा तस्मिन् परतः सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे तन् ओ ति इति जाते वर्णसम्मेलने **तनोति** इति रूपं भवति। एवमेव प्रक्रिया सिपि मिपि च ज्ञेया।

अपित्प्रत्ययेषु तसादिषु सार्वधातुकमपित् इत्यनेन ङिद्वद्भावे क्ङिति च इत्यनेन गुणनिषेधः। तेन तसादौ न गुणः। बहुवचने झिप्रत्यये प्रक्रियया तनु अन्ति इति जाते इको यणचि इत्यनेन इकः स्थाने यणि वकारादेशे **तन्वन्ति** इति रूपं भवति।

अत्र अवधेयम् - तन्-धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे तनः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

वसि मसि वहौ महिङि च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन उकारस्य विकल्पेन लोपो भवति। तेन – तन्वः/तनुवः, तन्मः/तनुमः, तन्वहे/तनुवहे, तन्महे/तनुमहे इत्येवं रूपाणि सिध्यन्ति। सिपि

उतश्च प्रत्ययादसंयोगपूर्वात् इत्यनेन हेः लोपो भवति। आत्मनेपदस्थले तादीनाम् समेषाम् अपित्त्वात् सर्वत्रैव गुणनिषेधः।

तथा हि लटि परस्मैपदे रूपाणि - **तनोति, तनुतः, तन्वन्ति। तनोषि, तनुथः, तनुथ। तनोमि, तन्वः/तनुवः, तन्मः/तनुमः।** आत्मनेपदे रूपाणि च - **तनुते, तन्वाते, तन्वते। तनुषे, तन्वाथे, तनुध्वे। तन्वे, तन्वहे/तनुवहे, तन्महे/तनुमहे।**

लिटि तनः परे तिपि णलि द्वित्वे हलादिशेषे ततन् अ इति जाते अत उपधायाः इत्यनेन उपधावृद्धौ ततान् अ इति जाते वर्णसम्मेलने **ततान** इति रूपं सिध्यति। एवमेव मिपि ऊह्यम्। तसि झौ थसि थे वसि मसि च असंयोगाल्लिट् कित् इत्यनेन कित्त्वे अत एकहल्मध्येऽनादेशादेर्लिटि इत्यनेन अभ्याससंज्ञकस्य प्रथमतकारस्य लोपे तनः तकारोत्तरवर्तिनः अकारस्य स्थाने एकारः भवति। सिपि सिपः स्थाने विधीयमानः थल् कित् न भवति इति हेतोः थलि च सेटि इत्यनेन एत्त्वाभ्यासलोपौ भवतः। आत्मनेपदस्थले सर्वत्रैव एत्वाभ्यासलोपौ भवतः। सिपि वसि मसि च इति परस्मैपदस्थले, थासि ध्वमि वहौ महिङि च इति आत्मनेपदस्थले च आर्धधातुकस्येड्वलादेः इति इडागमः। आत्मनेपदस्थले तप्रत्ययं झप्रत्ययं थास्प्रत्ययं च विहाय अन्यत्र टेः एत्वम् बोध्यम्।

तथा च लिटि परस्मैपदे रूपाणि - **ततान, तेनतुः, तेनुः। तेनिथ, तेनथुः, तेन। ततान/ततन, तेनिव, तेनिम।**

आत्मनेपदे रूपाणि च - **तेने, तेनाते, तेनिरे। तेनिषे, तेनाथे, तेनिध्वे। तेने, तेनिवहे, तेनिमहे।**

लुटि तिपि उप्रत्ययापवादभूते तासि तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे डादेशे डित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे **तनिता** इति रूपम्। एवम् अग्रे बोद्धव्यम्। लुटि परस्मैपदस्थले आत्मनेपदस्थले च सर्वत्रैव इडागमः भवति। उभयविधस्थलेऽपि प्रथमपुरुषे समानम् रूपम्। लुटि आत्मनेपदस्थले थासं विहाय अन्यत्र टेः एत्वम् भवति।

तथा हि परस्मैपदे रूपाणि - **तनिता, तनितारौ, तनितारः। तनितासि, तनितास्थः, तनितास्थ। तनितास्मि, तनितास्वः, तनितास्मः।**

आत्मनेपदे रूपाणि च - **तनिता, तनितारौ, तनितारः। तनितासे, तनितासाथे, तनिताध्वे। तनिताहे, तनितास्वहे, तनितास्महे।**

लृटि प्रथमपुरुषैकवचने तिपि उप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् इडागमे आदेशप्रत्यययोः इत्यनेन प्रत्ययावयवस्य सकारस्य षत्वे **तनिष्यति** इति रूपं भवति, तप्रत्यये **तनिष्यते** इति रूपम्। लृटि अपि आत्मनेपदे थास्प्रत्ययं विहाय अन्यत्र टेः एत्वम् भवति। अपि च लृटि सर्वत्रैव इडागमः भवति। आत्मनेपदे रूपाणाम् सिद्धये एध्-धातोः प्रक्रिया द्रष्टुम् शक्या।

तथा च लृटि परस्मैपदे रूपाणि - **तनिष्यति, तनिष्यतः, तनिष्यन्ति। तनिष्यसि, तनिष्यथः, तनिष्यथ। तनिष्यामि, तनिष्यावः, तनिष्यामः।**

आत्मनेपदे रूपाणि च - **तनिष्यते, तनिष्येते, तनिष्यन्ते। तनिष्यसे, तनिष्येथे, तनिष्यध्वे। तनिष्ये, तनिष्यावहे, तनिष्यामहे।**

लोटि प्रथमपुरुषैकवचने तिपि उप्रत्यये तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे तिपः इकारस्य उकारे तनोतु इति रूपं भवति, तातङि तनुतात् इत्यपि। अग्रे रूपाणि स्वयं साध्यन्ताम्।

तथा च परस्मैपदे रूपाणि - **तनोतु/तनुतात्, तनुताम्, तन्वन्तु। तनु/तनुतात्, तनुतम्, तनुत। तनवानि, तनवाव, तनवाम।**

आत्मनेपदे रूपाणाम् सिद्धये स्वादिगणीयसु-धातुरूपाणि द्रष्टुम् शक्यानि। तथा हि रूपाणि - **तनुताम्, तन्वाताम्, तन्वताम्। तनुष्व, तन्वाथाम्, तनुध्वम्। तनवै, तनवावहै, तनवामहै।**

लङि परस्मैपदस्थले आत्मनेपदस्थले च स्वादिगणीयधातुरूपवत् प्रक्रिया ज्ञेया। तथा च परस्मैपदे रूपाणि - **अतनोत्, अतनुताम्, अतन्वन्। अतनोः, अतनुतम्, अतनुत। अतनवम्, अतन्व/अतनुव, अतन्म/अतनुम।** आत्मनेपदे रूपाणि च – **अतनुत, अतन्वाताम्, अतन्वत। अतनुथाः, अतन्वाथाम्, अतनुध्वम्। अतन्वि, अतन्वहि/अतनुवहि, अतन्महि/अतनुमहि।**

विधिलिङि अपि परस्मैपदस्थले आत्मनेपदस्थले च स्वादिगणीयसुधातुरूपवत् प्रक्रिया ज्ञेया। तथा हि परस्मैपदे रूपाणि - **तनुयात्, तनुयाताम्, तनुयुः। तनुयाः, तनुयातम्, तनुयात। तनुयाम्, तनुयाव, तनुयाम।** आत्मनेपदे रूपाणि च - **तन्वीत, तन्वीयाताम्, तन्वीरन्। तन्वीथाः, तन्वीयाथाम्, तन्वीध्वम्। तन्वीय, तन्वीवहि, तन्वीमहि।**

आशीर्लिङि तिपि लिङाशिषि इत्यनेन तिपः आर्धधातुकसंज्ञायां तनादिकृञ्भ्य उः इत्यनेन उप्रत्ययस्याप्राप्तिः। ततः यासुटि अनुबन्धलोपे सुट्तिथोः इत्यनेन सुडागमे तिपः इकारस्य लोपे तन् यास् स् त् इति जाते स्कोः संयोगाद्योरन्ते च इत्यनेन सकारद्वयस्यापि लोपे **तन्यात्** इति रूपं भवति। अग्रे प्रक्रियाः स्वयं साध्याः। तथा च परस्मैपदे रूपाणि - **तन्यात्, तन्यास्ताम्, तन्यासुः। तन्याः, तन्यास्तम्,तन्यास्त। तन्यासम्, तन्यास्व, तन्यास्म।**

आत्मनेपदस्थले एध्-धातुवत् रूपाणि भवन्ति। अत्र केवलम् प्रथमपुरुषैकवचने रूपम् प्रदर्श्यते। तद्यथा - तन्-धातोः आशीर्लिङि तप्रत्यये सीयुटि सुटि तन् सीय् स् त इति स्थितिः भवति। यदागमपरिभाषया अत्र सीय्+स्+त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय्+स्+त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे तन् इ सीय् स् त इति स्थितिः जायते। तदा लोपो व्योर्वलि इत्यनेन सीयुटः यकारस्य लोपे तनि सी स् त इति स्थिते सीयुटः सकारस्य तथा सुटः सकारस्य यथाक्रमं इकाररूपात् ईकाररूपाच्च इणः परत्वात् अपदान्तत्वात् प्रत्ययावयवत्वात् आदेशप्रत्यययोः इति सूत्रेण मूर्धन्यादेशे षकारे तनिषीष् त इति स्थिते ष्टुना ष्टुः इत्यनेन तकारस्य ष्टुत्वे टकारे **तनिषीष्ट** इति रूपं सिध्यति। आतामादौ रूपाणि स्वयम् बोद्धव्यानि।

तथा च आत्मनेपदे आशीर्लिङि रूपाणि - **तनिषीष्ट, तनिषीयास्ताम्, तनिषीरन्। तनिषीष्ठाः, तनिषीयास्थाम्, तनिषीध्वम्। तनिषीय, तनिषीवहि, तनिषीमहि।**

लुङि प्रथमपुरुषैकवचने अटि तिपि इकारलोपे प्राप्तम् उप्रत्ययम् बाधित्वा च्लौ सिचि सिचः आर्धधातुकं शेषः इत्यनेन आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन सिचः इडागमे अ तन् इ स् त् इति जाते अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अ तन् इ स् ई त् इति जाते वदव्रजहलन्तस्याचः इति हलन्तलक्षणायाम् वृद्धौ प्राप्तायाम् नेटि इति तन्निषेधे अतो हलादेर्लघोः इत्यनेन विकल्पेन तनः अकारस्य वृद्धौ आकारे इट ईटि इत्यनेन सकारस्य लोपे सवर्णदीर्घे वर्णसम्मेलने **अतानीत्** इति रूपम्। वृद्ध्यभावपक्षे **अतनीत्** इत्यपि रूपम् इति साकल्येन रूपद्वयम् भवति।

तथा च वृद्धिपक्षे - **अतानीत्, अतानिष्टाम्, अतानिषुः। अतानीः, अतानिष्टम्, अतानिष्ट। अतानिषम्, अतानिष्व, अतानिष्म।**

वृद्ध्यभावपक्षे - **अतनीत्, अतनिष्टाम्, अतनिषुः। अतनीः, अतनिष्टम्, अतनिष्ट। अतनिषम्, अतनिष्व, अतनिष्म।** इति एतानि रूपाणि भवन्ति।

तनः **लुङि** अटि आत्मनेपदसंज्ञकतप्रत्यये प्राप्तम् उप्रत्ययम् बाधित्वा च्लौ सिचि अ तन् स त इति जाते सिचः सकारस्य विकल्पेन लुग्विधातुम् सूत्रमिदमारभ्यते -

[२३.२] तनादिभ्यस्तथासोः॥ (२.४.७९)

सूत्रार्थः - तनादेः सिचो वा लुक्स्यात्तथासोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तनादिभ्यः (५/३), तथासोः (७/२) इति सूत्रगतपदच्छेदः। तन् आदिः येषां ते तनादयः इति बहुव्रीहिसमासः, तेभ्यः तनादिभ्यः। तश्च थाश्च तयोः इतरेतरयोगद्वन्द्वे तथासौ, तयोः तथासोः। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इत्यतः सिचः (६/१) इत्यस्य, ण्यक्षत्रियार्षञितो यूनि लुगणिञोः इत्यतः लुक् (१/१) इत्यस्य, विभाषा घ्राधेट्शाच्छासः इत्यतः विभाषा इत्यस्य च अनुवृत्तिर्भवति। सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् इति परिभाषया प्रथमपुरुषैकवचनस्य तप्रत्ययस्यैव अत्र सूत्रे ग्रहणं न तु तस्थस्थमिपां तान्तन्तामः इति सूत्रेण विधीयमानस्य तादेशस्य ग्रहणम्। एवञ्च सूत्रार्थस्तावत् - तनादिगणपठितधातुभ्यः परस्य सिचः विकल्पेन लुक् भवति त-थासोः प्रत्यययोः परतः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण अ तन् स त इति स्थिते प्रकृतसूत्रेण सिचः सकारस्य विकल्पेन लुक् भवति। यतो हि अत्र तप्रत्ययः परोऽस्ति। ततः अतन् त इति जाते अग्रिमम् सूत्रमारभ्यते -

[२३.३] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति॥ (६.४.३७)

सूत्रार्थः - अनुनासिकान्तानामेषां वनतेश्च लोपः स्यात् झलादौ किति ङिति च परे।

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदचतुष्टयमस्ति।अनुदात्तोपदेशवनतितनोत्यादीनाम् (६/३), अनुनासिक (६/३), लोपः (१/१), झलि (७/१), क्ङिति (७/१) इति सूत्रगतपदच्छेदः। अनुनासिक इति लुप्तविभक्तिको निर्देशः। अनुदात्त उपदेशे येषां ते अनुदात्तोपदेशाः इति बहुव्रीहिसमासः। तनोतिः आदिः येषां ते तनोत्यादयः। अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च तेषाम् अनुदात्तोपदेशवनतितनोत्यादीनाम्। अनुनासिक इति लुप्तषष्ठ्यन्तं पदम् अनुदात्तोपदेशानाम् इत्यस्य तथा तनोत्यादीनाम् इत्यस्य विशेषणमस्ति अतः तदन्तविधौ अनुनासिकान्तानाम् इत्यर्थलाभः। क् च ङ् च क्ङौ, तौ इतौ यस्य स क्ङित् तस्मिन् क्ङिति द्वन्द्वगर्भबहुव्रीहिसमासः। झलि इति पदं क्ङिति इत्यस्य विशेषणमस्ति। अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ झलादौ क्ङिति इत्यर्थो लभ्यते। एवञ्च सूत्रार्थस्तावत् - अनुनासिकान्तानाम् अनुदात्तोपदेशधातूनाम्, अनुनासिककान्तानां तनोत्यादिधातूनां, वन्धातोः च लोपो भवति झलादौ क्ङिति च परे। अयञ्च लोपः अलोऽन्त्यस्य इति परिभाषया अन्त्यस्यैव वर्णस्य अर्थात् अनुनासिकवर्णस्य भवति।

उदाहरणम् - यमि रमि नमि गमि हनि मन्यतयोऽनुदात्तोपदेशाः। तनु, क्षणु, क्षिणु, ऋणु, तृणु, घृणु, वनु, मनु-तनोत्यादयः। एवञ्च साकल्येन पञ्चदशानां धातूनाम् उदाहरणानि अत्र प्रदर्श्यन्ते -

१. यम् (रोकना) - यतः (क्त), यतवान् (क्तवतु), यत्वा (क्त्वा),

२. रम् (खेलना) - रतः (क्त), रतवान् (क्तवतु), रत्वा (क्त्वा),

३. नम् (झुकना) - नतः, नत्वा, नतवान्।

४. गम् (जाना) - गतः, गत्वा, गतवान्।

५. हन् (मारना) - हतः, हत्वा, हतवान्।

६. मन्य (मानना-जानना) - मतः, मत्वा, मतवान्।

७. वन् (शब्द करना, सेवा करना, हिंसा करना) - वतिः (क्तिन्)।

८. तन् (विस्तार करना) - ततः, तत्वा, ततवान्। अतत, अतथाः।

९. क्षणु (हिंसा करना) - क्षतः, क्षत्वा, क्षतवान्। अक्षत, अक्षथाः।

१०. क्षिणु (हिंसा करना) - क्षितः, क्षित्वा, क्षितवान्। अक्षित, अक्षिथाः।

११. ऋणु (जाना) - ऋतः, ऋत्वा, ऋतवान्। आर्तः, आर्थाः।

१२. तृणु (खाना) - तृतः, तृत्वा, तृतवान्। अतृत, अतृथाः।

१३. घृणु (चमकना) - घृतः, घृत्वा, घृतवान्। अघृत, अघृथाः।

१४. वनु (मागना) - वतः, वत्वा, वतवान्। अवत, अवथाः।

१५. मन् (जानना) - मतः, मत्वा, मतवान्। अमत, अमथाः।

पूर्वोक्तप्रकारेण अतन् त इति जाते सार्वधातुकमपित् इत्यनेन तप्रत्ययस्य ङिद्वद्भावः। स च तप्रत्ययः झलादिरपि अस्ति। तस्मात् प्रकृतसूत्रेण नकारलोपो भवति। यतो हि तनः नकारात् परं यः

तप्रत्ययः स झलादिः ङित् अस्ति। ततः वर्णसम्मेलने **अतत** इति रूपं सिध्यति। सिचः **लुगभावपक्षे** इडागमे अ तन् इ स् त इति जाते सिचः सकारस्य षत्वे ष्टुना ष्टुः इति ष्टुत्वे तकारस्य टकारे **अतनिष्ट** इति रूपम् अपि भवति इति प्रथमपुरुषैकवचने रूपद्वयम् भवति। ध्वमि प्रक्रियया अ तन् इ स् ध्वम् इति जाते धि च इति योगेन सकारस्य लोपे अ तन् इ ध्वम् इति जाते अतन्+इ इति समुदायस्य ध्वमि परतः अङ्गसंज्ञाविज्ञानात् इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति सूत्रेण धकारस्य ढत्वे अतनिढ्वम् इति रूपम्। सर्वत्रैव आदेशप्रत्यययोः इति षत्वम्। अन्यानि रूपाणि स्वयम् बोद्धव्यानि।

तथा च आत्मनेपदे रूपाणि- **अतत/अतनिष्ट, अतनिषाताम्, अतनिषत। अतथाः/अतनिष्ठाः, अतनिषाथाम्, अतनिढ्वम्। अतनिषि, अतनिष्वहि, अतनिष्महि।**

लृङि अटि तिपि उप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् वलादित्वाच्च आर्धधातुकस्येड्वलादेः इति इडागमे सकारस्य षत्वे तिपः इकारस्य लोपे वर्णसम्मेलने **अतनिष्यत्** इति रूपम्। तप्रत्यये तु **अतनिष्यत** इति रूपम् सिध्यति। अत्र तथा विशेषो नास्ति।

तथा हि परस्मैपदे रूपाणि - **अतनिष्यत्, अतनिष्यताम्, अतनिष्यन्। अतनिष्यः, अतनिष्यतम्, अतनिष्यत। अतनिष्यम्, अतनिष्याव, अतनिष्याम।**

आत्मनेपदे च रूपाणि - **अतनिष्यत, अतनिष्येताम्, अतनिष्यन्त। अतनिष्यथाः, अतनिष्येथाम्, अतनिष्यध्वम्। अतनिष्ये, अतनिष्यावहि, अतनिष्यामहि।**

।।इति तनादिगणे तन्-धातुः।।

अथ कृधातुः

अधुना **कृधातुः** आलोच्यते।

कृ (डुकृञ् करणे) इति उभयपिदनः अनिटः सकर्मकात् तनादिगणीयात् धातोः कर्तरि **लटि** तिपि कृ ति इति जाते शपि प्राप्ते तं बाधित्वा तनादिकृञ्भ्य उः इति योगेन उप्रत्यये कृ उ ति इति जाते उप्रत्ययस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन ऋकारस्य गुणे अकारे उरण् रपरः इत्यनेन रपरत्वे कर् उ ति इति जायते। ततः तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे वर्णसम्मेलने च करोति इति रूपं भवति। एवमेव सिपि मिपि च बोध्यम्।

तसि प्राप्तम् शपं बाधित्वा उप्रत्यये कृ उ तस् इति जाते ऋकारस्य गुणे अकारे रपरत्वे कर् उ तस् इति जाते तसः सार्वधातुकमपित् इति ङिद्वद्भावे उकारस्य गुणनिषेधो भवति। ततः अग्रे विशेषम् प्रदर्शयितुम् सूत्रमिदमारभ्यते -

[२३.४] अत उत्सार्वधातुके॥ (६.४.११०)

सूत्रार्थः - उप्रत्ययान्तस्य कृञोऽकारस्य उः स्यात्, सार्वधातुके क्ङिति।

सूत्रव्याख्या - विधिसूत्रमिदम् पदत्रयात्मकम्। अतः (६/१), उत् (१/१), सार्वधातुके (७/१) इति सूत्रगतपदच्छेदः। नित्यं करोतेः इत्यतः करोतेः (५/१) इति पदमनुवर्तते। तस्य च षष्ठ्येकवचनान्ततया विपरिणामः। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रात् क्ङिति इति पदम् अनुवर्तते। उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया विपरिणामः। तदा करोतेः इत्यस्य विशेषणत्वात् तदन्तविधौ उप्रत्ययान्तस्य करोतेः इत्यर्थलाभः। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन सार्वधातुके किति, सार्वधातुके ङिति इत्यर्थलाभः। सूत्रार्थो हि उप्रत्ययान्तस्य कृधातोः अतः स्थाने उत् इत्यादेशो भवति सार्वधातुके किति ङिति च प्रत्यये परतः इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कर् उ तस् इति जाते तसः ङित्त्वात् सार्वधातुकत्वात् च अत उत्सार्वधातुके इति प्रकृतसूत्रेण ककारोत्तरवर्तिनः अकारस्य स्थाने उकारादेशे तसः सकारस्य रुत्वे रेफस्य च विसर्गे कृते **कुरुतः** इति रूपं सिध्यति।

झौ झेरन्तादेशे कृ इत्यस्य ऋकारस्य गुणे अकारे रपरत्वे कर् उ अन्ति इति जाते करः अकारस्य उकारे कुर् उ अन्ति इति जाते इको यणचि इत्यनेन प्रत्ययस्य उकारस्य यणि वकारादेशे कुर् व् अन्ति इति जायते। ततः हलि च इत्यनेन उपधादीर्घे प्राप्ते सूत्रमिदमारभ्यते -

[२३.५] न भकुर्छुराम्॥ (८.२.७९)

सूत्रार्थः - भस्य कुर्छुरोरुपधाया न दीर्घः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। न (अव्ययम्), भ-कुर्-छुराम् (६/३) इति सूत्रगतपदच्छेदः। र्वोरुपधाया दीर्घ इकः इति सूत्रात् उपधायाः (६/१), दीर्घः (१/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। भं च कुर् च छुर् च भकुर्छुरः, तेषाम् भकुर्छुराम् इति इतरेतरयोगद्वन्द्वः। भ इति एका संज्ञा। सा च यचि भम् इत्यनेन विधीयते। सूत्रार्थस्तावत् - भसंज्ञकस्य उपधायाः, कुरः उपधायाः, छुरः च उपधायाः दीर्घो न भवति इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् व् अन्ति इत्यत्र हलि च इति प्राप्तस्य उपधादीर्घस्य प्रकृतसूत्रेण निषेधः। ततः वर्णसम्मेलने **कुर्वन्ति** इति रूपं सिध्यति। एवम् अग्रे ऊह्यम्।

उत्तमपुरुषस्य द्विवचने वसि उप्रत्यये प्रक्रियया कुर् उ वस् इति जाते लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन विकल्पेन प्रत्ययस्य उकारस्य लोपे प्राप्ते सूत्रमिदमारभ्यते -

[२३.६] नित्यं करोतेः॥ (६.४.१०८)

सूत्रार्थः - करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। नित्यम् (२/१), करोतेः (५/१) इति सूत्रगतपदच्छेदः। नित्यम् इति क्रियाविशेषणम्। उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया

विपरिणामः। लोपश्चास्यान्यतरस्यां म्वोः इत्यतः म्वोः (७/२), लोपः (१/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। सूत्रार्थो हि कृधातोः परस्य प्रत्ययस्य उकारस्य नित्यं लोपो भवति मकारे अथवा वकारे परतः। सूत्रमिदं लोपश्चास्यान्यतरस्यां म्वोः इत्यस्य अपवादभूतम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् उ वस् इति जाते कृधातोः परम् उकारोऽस्ति, किञ्च वकारः तस्मात् उकारात् परोऽपि अस्ति। अतः प्रकृतसूत्रेण उकारस्य नित्यं लोपो भवति। तेन कुर् वस् इति जाते सकारस्य रुत्वे रेफस्य च विसर्गे **कुर्वः** इति रूपं सिध्यति। मसि अनया एव प्रक्रियया **कुर्मः** इति रूपं सिध्यति।

अत्र अवधेयम् - (डुकृञ्) कृ-धातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे कृधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले तु सर्वत्रैव ङिद्वद्भावात् न प्रत्ययस्य उकारस्य गुणः। किञ्च अत उत्सार्वधातके इत्यनेन सर्वत्रैव अकारस्य उकारो भवति।

तथा च लटि परस्मैपदे रूपाणि - **करोति, कुरुतः, कुर्वन्ति। करोषि, कुरुथः, कुरुथ। करोमि, कुर्वः, कुर्मः।**

आत्मनेपदे च रूपाणि – **कुरुते, कुर्वाते, कुर्वते। कुरुषे, कुर्वाथे, कुरुध्वे। कुर्वे, कुर्वहे, कुर्महे।**

{सूत्रम्. **लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) = असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात्।}

लिटि प्रथमपुरुषैकवचनविवक्षायाम् तिपि कृ ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपो सर्वादेशे णलि अनुबन्धलोपे कृ अ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः कृ इत्यस्य द्वित्वे कृ कृ अ इति जाते द्विरुक्तस्य पूर्वभागस्य कृ इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च कर् कृ अ इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे क कृ अ इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च कृ अ इति जाते णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य कृञः ऋकारस्य वृद्धौ आकारे उरण् रपरः इति रपरत्वे च च कार् अ इति जाते वर्णसम्मेलने चकार इति रूपम् सिध्यति। थलि गुणः भवति। मिपि णलुत्तमो वा इति विकल्पेन मिबादेशस्य णलः णित्त्वं विधीयते तेन णित्त्वपक्षे अचो ञ्णिति इति वृद्धौ चकार इति रूपम्। णित्त्वाभावपक्षे सार्वधातुकार्धधातुकयोः इति गुणे चकर इति रूपम्। अतुसादौ तु असंयोगाल्लिट् कित् इत्यनेन किद्वद्भावे क्ङिति च इति गुणनिषेधः। तेन अतुसादौ अजादिप्रत्यये इको यणचि इति यण् भवति इत्यवधेयम्।

आत्मनेपदे रूपाणाम् प्रक्रियायै एध्धातोः लिटि रूपाणि द्रष्टव्यानि। तत्र सर्वेषाम् रूपाणाम् प्रक्रियाः प्रदर्शिताः। अत्र भवताम् बोधसौकर्याय केवलम् प्रथमपुरुषैकवचने रूपम् प्रदर्श्यते। तथा च प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये कृ त इति स्थिते लिटस्तझयोरेशिरेच् इति लिडादेशस्य त इत्यस्य स्थाने एश् इति सर्वादेशे अनुबन्धलोपे कृ ए इति जाते सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

ऋकारस्य गुणे प्राप्ते असंयोगाल्लिट् कित् इति सूत्रेण लिडादेशस्य त-प्रत्ययस्य कित्त्वे क्ङिति च इति गुणनिषेधे लिटि धातोरनभ्यासस्य इति अस्मात् परत्वात् इको यणचि इति यणि प्राप्ते द्विर्वचनेऽचि इति द्वित्वार्थम् अचः यणादेशनिषेधे लिटि धातोरनभ्यासस्य इति सूत्रेण धातोर्द्वित्वे कृ कृ ए इति जाते पूर्वोऽभ्यासः इति सूत्रेण द्विरुक्तस्य पूर्वभागस्य अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च कर् कृ ए इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे क कृ ए इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च कृ ए इति जाते इको यणचि इति सूत्रेण ऋकारस्य यणि रेफे च क्र ए इति जाते वर्णसम्मेलने चक्रे इति रूपम् सिध्यति। अन्येषाम् रूपाणाम् प्रक्रियाः स्वयम् साधनीयाः। लिटि थलादौ आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः।

तथा च परस्मैपदे रूपाणि - **चकार, चक्रतुः, चक्रुः। चकर्थ, चक्रथुः, चक्र। चकार/चकर, चकृव, चकृम।**

आत्मनेपदे रूपाणि च - **चक्रे, चक्राते, चक्रिरे। चकृषे, चक्राथे, चकृढ्वे। चक्रे, चकृवहे, चकृमहे।**

लुटि पूर्ववत् इण्निषेधः। उप्रत्ययापवादस्य तासः आर्धधातुकत्वात् आर्धधातुके परे सार्वधातुकार्धधातुकयोः इति गुणः। इतोऽपि विशेषो अत्र नास्ति।

तथा च परस्मैपदे रूपाणि - **कर्ता, कर्तारौ, कर्तारः। कर्तासि, कर्तास्थः, कर्तास्थ। कर्तास्मि, कर्तास्वः, कर्तास्मः।**

आत्मनेपदे रूपाणि च – **कर्ता, कर्तारौ, कर्तारः। कर्तासे, कर्तासाथे, कर्ताध्वे। कर्ताहे, कर्तास्वहे, कर्तास्महे।**

लृटि तिपि कृ ति इति जाते उप्रत्ययापवादे स्यप्रत्यये कृ स्य ति इति जाते उप्रत्ययापवादस्य स्यप्रत्ययस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। ततः ऋद्धनोः स्ये इत्यनेन स्यस्य इडागमे टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया स्यस्य आद्यावयवे कृ इ स्य ति इति जायते। ततः स्यस्य आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां कृ इत्यस्य ऋकारस्य सार्वधातुकार्धधातुकयोः इत्यनेन गुणे उरण् रपरः इत्यनेन रपरत्वे इकारात्परस्य सकारस्य षत्वे वर्णसम्मेलने **करिष्यति** इति रूपं भवति। तप्रत्यये पूर्ववत् प्रक्रियया **करिष्यते** इति रूपम् भवति। आत्मनेपदस्थले अत्र थासम् विहाय टेः एत्वम् भवति इति अवधेयम्।

तथा च परस्मैपदे रूपाणि - **करिष्यति, करिष्यतः, करिष्यन्ति। करिष्यसि, करिष्यथः, करिष्यथ। करिष्यामि, करिष्यावः, करिष्यामः।**

आत्मनेपदे रूपाणि च – **करिष्यते, करिष्येते, करिष्यन्ते। करिष्यसे, करिष्येथे, करिष्यध्वे। करिष्ये, करिष्यावहे, करिष्यामहे।**

लोटि न कश्चित् विशेषः। तथा हि परस्मैपदे रूपाणि - **करोतु/कुरुतात्, कुरुताम्, कुर्वन्तु। कुरु/कुरुतात्, कुरुतम्, कुरुत। करवाणि, करवाव, करवाम।**

आत्मनेपदे रूपाणि च - **कुरुताम्, कुर्वाताम्, कुर्वताम्। कुरुष्व, कुर्वाथाम्, कुरुध्वम्। करवै, करवावहै, करवामहै।**

लङि अपि न कोऽपि विशेषः। तथा हि परस्मैपदे रूपाणि - **अकरोत्, अकुरुताम्, अकुर्वन्। अकरोः, अकुरुतम्, अकुरुत। अकरवम्, अकुर्व, अकुर्म।**

आत्मनेपदे रूपाणि च – **अकुरुत, अकुर्वाताम्, अकुर्वत। अकुरुथाः, अकुर्वाथाम्, अकुरुध्वम्। अकुर्वि, अकुर्वहि, अकुर्महि।**

{सूत्रम्. **ऋद्धनोः स्ये** (७.२.७०) = ऋतो हन्तेश्च स्यस्य इट् स्यात्।}

विधिलिङि कृधातोः तिपि उप्रत्यये यासुटि सुटि गुणे रपरत्वे उत्वे तिपः इकारलोपे कुर् उ यास् स् त् इति जाते लिङः सलोपोऽनन्त्यस्य इति योगेन सकारद्वयस्य लोपे कुर् उ या त् इति जाते सूत्रमिदमारभ्यते -

[२३.७] ये च॥ (६.४.१०९)

सूत्रार्थः - कृञ उलोपो यादौ प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। ये (७/१), च इति सूत्रगतपदच्छेदः। यकारात् अकारः उच्चारणार्थः। नित्यं करोतेः इत्यतः करोतेः (५/१), इत्यस्यानुवृत्तिर्भवति, उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया विपरिणामः। लोपश्चास्यान्यतरस्यां म्वोः इत्यतः लोपः (१/१) इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य इत्यधिकृतमस्ति, अतः प्रत्यये इत्यस्याध्याहारो भवति। ततः प्रत्यये इत्यस्य विशेषणं भवति ये इति, तेन तदादिविधौ यादौ प्रत्यये इत्यर्थलाभः। सूत्रार्थो हि कृधातोः परस्य प्रत्ययस्य उकारस्य लोपो भवति यादौ प्रत्यये परे इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् उ या त् इति जाते यात् इति यकारादिप्रत्ययः विद्यमानः अस्ति, अतः प्रकृतसूत्रेण कृधातोः परस्य उकारस्य लोपो भवति। ततः वर्णसम्मेलने **कुर्यात्** इति रूपं भवति। एवम् अग्रे ऊह्यम्।

तथा हि परस्मैपदे रूपाणि - **कुर्यात्, कुर्याताम्, कुर्युः। कुर्याः, कुर्यातम्, कुर्यात। कुर्याम्, कुर्याव, कुर्याम।**

आत्मनेपदे रूपाणि च – **कुर्वीत, कुर्वीयाताम्, कुर्वीरन्। कुर्वीथाः, कुर्वीयाथाम्, कुर्वीध्वम्। कुर्वीय, कुर्वीवहि, कुर्वीमहि।**

आशीर्लिङि तिपि यासुटि सुटि कृ यास् स् त् इति जाते सकारद्वयस्यापि स्कोः संयोगाद्योरन्ते च इत्यनेन लोपे यात् यकाराद्यार्धधातुकः लिङ् अस्ति। अतः रिङ् शयग्लिङक्षु इत्यनेन कृधातोः ऋकारस्य स्थाने रिङ्-आदेशे अनुबन्धलोपे क् रि या त् इति जाते वर्णसम्मेलने च **क्रियात्** इति रूपं सिध्यति। सूत्रेऽस्मिन् रीङ् ऋतः इत्यतः रीङ् इत्यस्य अनुवर्तमाने पुनः रिङ्-विधानसामर्थ्यात् अकृत्सार्वधातुकयोर्दीर्घः इति रेः इकारस्य दीर्घो न इत्यवधेयम्। एवम् अन्यत्रापि ऊह्यम्।

तथा च परस्मैपदे रूपाणि - **क्रियात्, क्रियास्ताम्, क्रियासुः। क्रियाः, क्रियास्तम्, क्रियास्त। क्रियासम्, क्रियास्व, क्रियास्म।**

आत्मनेपदस्थले उश्च इत्यनेन झलादिलिङः कित्त्वम् विधीयते। अतः ऋकारस्य स्थाने नैव गुणादेशः। प्रथमपुरुषैकवचने तप्रत्यये सीयुटि सुटि कृ सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय्+स्+त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय्+स्+त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति सीयुटः यकारलोपे कृ सी स् त इति जाते आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे वर्णसम्मेलने **कृषीष्ट** इति रूपम् सिध्यति।

तथा हि आत्मनेपदे रूपाणि – **कृषीष्ट, कृषीयास्ताम्, कृषीरन्। कृषीष्ठाः, कृषीयास्थाम्, कृषीढ्वम्। कृषीय, कृषीवहि, कृषीमहि।**

{सूत्रम्. **रिङ् शयग्लिङक्षु** (७.४.२८) = शे यकि यादावार्धधातुके लिङि च ऋतः रिङादेशः स्यात्।}

{सूत्रम्. **उश्च** (१.२.१२) = ऋवर्णात् परौ झलादी लिङ् तङ्परः सिच्चेत्येतौ कितौ स्तः।}

लुङि तिपि इकारलोपे अडागमे उप्रत्ययापवादे च्लौ सिचि अपृक्तहलः ईडागमे अकृ स् ईत् इति जाते सिचः आर्धधातुकत्वात् प्राप्तस्य वलादिलक्षणस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। ततः सिचि वृद्धिः परस्मैपदेषु इत्यनेन कृ इत्यस्य ऋकारस्य वृद्धौ अकार् स् ईत् इति जाते सकारस्य षत्वे वर्णसम्मेलने **अकार्षीत्** इति रूपं भवति। एवमग्रेऽपि। तथा च परस्मैपदे रूपाणि - **अकार्षीत्, अकार्ष्टाम्, अकार्षुः। अकार्षीः, अकार्ष्टम्, अकार्ष्ट। अकार्षम्, अकार्ष्व, अकार्ष्म।**

आत्मनेपदस्थले प्रथमपुरुषैकवचने तप्रत्यये अडागमे उप्रत्ययापवादे च्लौ सिचि अ कृ स् त इति जाते तनादिभ्यस्तथासोः इत्यनेन विकल्पेन सकारस्य लुकि **अकृत** इति रूपं सिध्यति। लुगभावपक्षे **ह्रस्वादङ्गात्** इत्यनेन झलि परे सिचः सकारस्य लोपे **अकृत** इति समानमेव रूपं सिध्यति। झल् परो नास्ति चेत् सकारोलोपोऽपि न भवति तेन **अकृषाताम्** ,**अकृषाथाम्** इत्यादीनि रूपाणि सिध्यन्ति।

तथा च लुङि आत्मनेपदे रूपाणि - **अकृत, अकृषाताम्, अकृषत। अकृथाः, अकृषाथाम्, अकृढ्वम्। अकृषि, अकृष्वहि, अकृष्महि।**

{सूत्रम्. **ह्रस्वादङ्गात्** (८.२.२७) = (ह्रस्वान्तात् अङ्गात्) सिचो लोपो झलि।}

लृङि उप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् प्राप्तस्य वलादिलक्षणस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधेऽपि ऋद्धनोः स्ये इति इडागमो भवत्येव। किञ्च स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इति इग्लक्षणः गुणः भवति। उभयविधस्थले प्रक्रिया तु स्वयम् बोद्धव्या।

तथा हि परस्मैपदे रूपाणि - **अकरिष्यत्, अकरिष्यताम्, अकरिष्यन्। अकरिष्यः, अकरिष्यतम्, अकिरष्यत। अकरिष्यम्, अकरिष्याव, अकरिष्याम।**

आत्मनेपदे रूपाणि च – **अकरिष्यत, अकरिष्येताम्, अकरिष्यन्त। अकरिष्यथाः, अकरिष्येथाम्, अकरिष्यध्वम्। अकरिष्ये, अकरिष्यावहि, अकरिष्यामहि।**

।।इति कृधातुः।।

पाठगतप्रश्नाः-१

१. तनादिगणीयधातुभ्यः कः विकरणप्रत्ययो भवति।

२. कृधातोः कः विकरणप्रत्ययो भवति।

३. तनादिभ्यस्तथासोः इत्यस्य कोऽर्थः।

४. ये च इत्यस्य कोऽर्थः।

५. नित्यं करोतेः इत्यस्य कोऽर्थः।

६. अनुदात्तोपदेशादिसूत्रं पूरयत।

७. तन्-धातोः लटि उत्तमपुरुषद्विवचने आत्मनेपदे किम् रूपम्।

८. कृधातोः आशीर्लिङि प्रथमपुरुषैकवचने परस्मैपदे किम् रूपम्।

९. करिष्यति इत्यत्र इडागमः केन।

१०. तन्धातोः लङि प्रथमपुरुषैकवचने आत्मनेपदस्थले कति रूपाणि भवन्ति। तानि च कानि।

अथ क्र्यादिगणः

क्री (डुक्रीञ् द्रव्यविनिमये) इति उभयपदिनः अनुदात्तेतः अनिटः सकर्मकात् क्र्यादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायां **लटि** परस्मैपदसंज्ञके तिपि क्री ति इति जाते कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२३.८] क्र्यादिभ्यः श्ना॥ (३.१.८१)

सूत्रार्थः - क्र्यादिगणपठितधातुभ्यः श्ना-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। क्र्यादिभ्यः (५/३), श्ना (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः

क्रियासमभिव्याहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्ना-प्रत्ययः परः इति। क्र्यादिगणः दशसु धातुगणेषु नवमः। क्री आदिः येषाम् (धातूनाम्) ते क्र्यादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः क्र्यादिभ्यः। सूत्रार्थो हि कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः क्र्यादिगणपठितधातुभ्यः श्नाप्रत्ययः परो भवति इति। श्नाप्रत्ययस्य शकारस्य इत्संज्ञा लशक्वतद्धिते इत्यनेन भवति। अतः ना इत्येव शिष्यते। श्नाप्रत्ययः अपित् अस्ति। शित्त्वात् सार्वधातुकसंज्ञकोऽपि। अतः श्नाप्रत्ययस्य सार्वधातुकत्वात् अपित्त्वात् च सार्वधातुकमपित् इति ङिद्वद्भावः।

उदाहरणम्- पूर्वोक्तप्रकारेण क्री ति इति जाते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण श्नाप्रत्यये अनुबन्धलोपे च क्री ना ति इति जाते श्नाप्रत्ययस्य सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे प्राप्ते सार्वधातुकमपित् इत्यनेन श्नाप्रत्ययस्य ङिद्वद्भावे क्ङिति च इति गुणनिषेधः।ततः नकारस्य अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे वर्णसम्मेलने च **क्रीणाति** इति रूपं सिध्यति। तसि क्री ना तस् इति जाते सूत्रमिदमारभ्यते -

[२३.९] ई हल्यघोः॥ (६.४.११३)

सूत्रार्थः - श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि, न तु घुसंज्ञकस्य।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। ई (लुप्तप्रथमैकवचनान्तम् पदम्), हलि (७/१), अघोः (६/१) इति सूत्रगतपदच्छेदः। श्नाभ्यस्तयोरातः इति सूत्रमनुवर्तते। तस्य च सूत्रस्य श्नाभ्यस्तयोः (६/२), आतः (६/१) इति पदच्छेदः। अत उत्सार्वधातुके इत्यतः सार्वधातुके (७/१) इति पदमनुवर्तते। गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति (७/१) इति पदमनुवर्तते। श्नाभ्यस्तयोः आतः ईत् हलि क्ङिति सार्वधातुके अघोः इति पदयोजना। हलि इति सार्वधातुके इत्यस्य विशेषणमस्ति अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ हलादौ सार्वधातुके इत्यर्थलाभः। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन किति ङिति च सार्वधातुके इत्यर्थलाभः। सूत्रार्थो हि श्ना इत्यस्य आकारस्य, अभ्यस्तसंज्ञकस्य आकारस्य च ईत् स्यात् किति ङिति च हलादौ सार्वधातुके परतः। घुसंज्ञकस्य धातोः आकारस्य तु न इति। सूत्रमिदम् श्नाभ्यस्तयोरातः इति वक्ष्यमाणस्य सूत्रस्य अपवादभूतम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण क्री ना तस् इति स्थिते तसः सार्वधातुकमपित् इत्यनेन ङित्त्वात् हलादित्वात् सार्वधातुकत्वात् च तस्मिन् परतः ई हल्यघोः इति प्रकृतसूत्रेण ना इत्यस्य आकारस्य ईकारादेशे क्री नी तस् इति जाते नकारस्य णत्वे सकारस्य रुत्वे रेफस्य च विसर्गे **क्रीणीतः** इति रूपं सिध्यति।

बहुवचने झिप्रत्यये झेरन्तादेशे क्री ना अन्ति इति जाते सूत्रमिदमारभ्यते -

[२३.१०] श्नाभ्यस्तयोरातः॥ (६.४.११२)

सूत्रार्थः - श्नाभ्यस्तयोः आतो लोपः स्यात् क्ङिति सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। श्नाभ्यस्तयोः (६/२), आतः (६/१) इति सूत्रगतपदच्छेदः। श्नसोरल्लोपः इत्यतः लोपः (१/१) इति पदम् अनुवर्तते। अत उत्सार्वधातुके इत्यतः सार्वधातुके (७/१) इति पदमनुवर्तते। गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति (७/१) इति पदमनुवर्तते। श्नाभ्यस्तयोः आतः लोपः क्ङिति सार्वधातुके इति पदयोजना। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन किति ङिति च सार्वधातुके इत्यर्थलाभः। सूत्रार्थो हि श्ना इत्यस्य आकारस्य, अभ्यस्तसंज्ञकस्य आकारस्य च लोपः स्यात् किति ङिति च सार्वधातुके परतः इति।

अत्र विशेषः - अत्र श्नाभ्यस्तयोरातः इति उत्सर्गसूत्रम्। ई हल्यघोः इति अपवादसूत्रम्। श्नाभ्यस्तयोरातः इति सूत्रस्य सामान्यतया **अजादौ हलादौ** च किति ङिति च सार्वधातुके परतः प्राप्तिरस्ति। किन्तु **हलादौ** किति ङिति च सार्वधातुके परतः ई हल्यघोः इति सूत्रस्य प्रवृत्तेः ई हल्यघोः इत्ययं योगः श्नाभ्यस्तयोरातः इत्यस्य अपवादः। तेन हलादौ किति ङिति च सार्वधातुके परतः श्नाभ्यस्तयोरातः इत्यस्य न प्रवृत्तिः। अतः अजादौ किति ङिति च सार्वधातुके श्नाभ्यस्तयोरातः इत्यस्य प्रवृत्तिः बोध्या।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण क्री ना अन्ति इति जाते अन्ति इति अजादिः ङित् सार्वधातुकम् च अस्ति। अतः प्रकृतसूत्रेण नकारोत्तरवर्तिनः आकारस्य लोपे नस्य णत्वे वर्णसम्मेलने **क्रीणन्ति** इति रूपम्। एवमेव अग्रे हलादौ ङिति सार्वधातके परे ईत्वम्, अजादौ ङिति सार्वधातुके परे आकारलोपः ज्ञेयः।

अत्र अवधेयम् - (डुक्रीञ्) क्री-धातोः ञित्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे क्रीधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

तथा हि लटि परस्मैपदे रूपाणि - **क्रीणाति, क्रीणीतः, क्रीणन्ति। क्रीणासि, क्रीणीथः, क्रीणीथ। क्रीणामि, क्रीणीवः, क्रीणीमः।**

आत्मनेपदे रूपाणि च - **क्रीणीते, क्रीणाते, क्रीणते। क्रीणीषे, क्रीणाथे, क्रीणीध्वे। क्रीणे, क्रीणीवहे, क्रीणीमहे।**

लिटि परस्मैपदसंज्ञके तिपि णलि अनुबन्धलोपे क्री अ इति जाते क्री इत्यस्य द्वित्वे हलादिशेषे की क्री अ इति जायते। ततः ह्रस्वः इत्यनेन अभ्यासस्य ईकारस्य स्थाने ह्रस्वे इकारादेशे कि क्री अ इति जाते कुहोश्चुः इत्यनेन चुत्वे चकारे चि क्री अ इति जाते णलः णित्वात् अचो ञ्णिति इत्यनेन क्री इत्यस्य ईकारस्य वृद्धौ ऐकारे चिक्रै अ इति जाते ऐकारस्य स्थाने आयादेशे वर्णसम्मेलने **चिक्राय** इति रूपं सिध्यति। अतुसादौ असंयोगाल्लिट् कित् इत्यनेन कित्त्वात् गुणनिषेधः। क्रीधातोः अतुसि प्रक्रियया चिक्री अतुस् इति जाते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन ईकारस्य स्थाने इयङ्-आदेशे चिक् र् इय् अतुस् इति जाते सकारस्य रुत्वे रेफस्य च विसर्गे वर्णसम्मेलने **चिक्रियतुः** इति रूपं सिध्यति। एवम्

अग्रेऽपि ऊह्यम्। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे प्राप्ते तं बाधित्वा क्रादिनियमानुसारं नित्यम् इटि प्राप्ते तस्यापि अचस्तास्वत्थल्यनिटो नित्यम् इत्यनेन निषेधः प्राप्तः। तदा तं बाधित्वा भारद्वाजनियमेन वैकल्पिकः इडागमः। ततः इड्भावे इडभावे चेति पक्षद्वयेऽपि गुणः। वसि मसि च क्रादिनियमानुसारम् नित्यम् इडागमः।विभाषेटः इत्यनेन ध्वमः धस्य विकल्पेन ढत्वम् भवति तेन ध्वमि रूपद्वयम् भवति। ध्वमि वहौ महिङि च क्रादिनियमानुसारम् नित्यम् इडागमः। किञ्च अजादौ प्रत्यये परतः अनभ्यासस्य क्री इत्यस्य ईकारस्य इयङादेशो भवति इत्यवधेयम्। इयङादेशः तिपि सिपि मिपि च न भवति। गुणस्तु अतुसादौ न भवति यतो हि असंयोगाल्लिट् कित् इति किद्वद्भावेन क्ङिति च इति गुणनिषेधः।

तथा च परस्मैपदे रूपाणि - **चिक्राय, चिक्रियतुः, चिक्रियुः। चिक्रयिथ/चिक्रेथ, चिक्रियथुः, चिक्रिय। चिक्राय/चिक्रय, चिक्रियिव, चिक्रियिम।**

आत्मनेपदे रूपाणि च – **चिक्रिये, चिक्रियाते, चिक्रियिरे। चिक्रियिषे, चिक्रियाथे, चिक्रियिढ्वे/चिक्रियिध्वे । चिक्रिये, चिक्रियिवहे, चिक्रियिमहे।**

{सूत्रम्. **विभाषेटः** (८.३.७९) = इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्।}

लुटि श्नाप्रत्ययावपवादः तास्प्रत्ययो भवति। तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन। अपि च तासः आर्धधातुकसंज्ञकत्वात् तस्मिन् परे सर्वत्रैव सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारो भवति। इतोऽपि विशेषः अत्र नास्ति।

तथा च परस्मैपदे रूपाणि - **क्रेता, क्रेतारौ, क्रेतारः। क्रेतासि, क्रेतास्थः, क्रेतास्थ। क्रेतास्मि, क्रेतास्वः, क्रेतास्मः।**

आत्मनेपदे रूपाणि च - **क्रेता, क्रेतारौ, क्रेतारः। क्रेतासे, क्रेतासाथे, क्रेताध्वे। क्रेताहे, क्रेतास्वहे, क्रेतास्महे।**

लृटि प्रथमपुरुषैकवचने तिपि श्नाप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारे सकारस्य षत्वे क्रेष्यति इति रूपं सिध्यति। तप्रत्यये क्रेष्यति इति रूपम्। एवम् अन्यत्रापि ऊह्यम्। अत्र लृटि स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन।

तथा च परस्मैपदे रूपाणि - **क्रेष्यति, क्रेष्यतः, क्रेष्यन्ति। क्रेष्यसि, क्रेष्यथः, क्रेष्यथ। क्रेष्यामि, क्रेष्यावः, क्रेष्यामः।**

आत्मनेपदे रूपाणि च - **क्रेष्यते, क्रेष्येते, क्रेष्यन्ते। क्रेष्यसे, क्रेष्येथे, क्रेष्यध्वे। क्रेष्ये, क्रेष्यावहे, क्रेष्यामहे।**

लोटि उत्तमपुरुषे आडागमः पित् भवति। अतः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावो न भवति। ङित्त्वाभावे च न ईत्त्वं न वा आकारलोपः इत्यवधेयम्। तद्यथा - वसि मसि च आडुत्तमस्य पिच्च इत्यनेन आडागमे सति आकारव्यवधानम् भवति इति हेतोः श्ना इत्यस्मात् परे हल् न लभ्यते तस्मात् ई हल्यघोः इत्यनेन ईत्वं न भवति। अपि च आडागमस्य पित्त्वात् आकारलोपोऽपि न। ततः सवर्णदीर्घे **क्रीणाव**, **क्रीणाम** इत्येवं रूपं भवति।

तथा हि परस्मैपदे रूपाणि - **क्रीणातु/क्रीणीतात्, क्रीणीताम्, क्रीणन्तु। क्रीणीहि/क्रीणीतात्, क्रीणीतम्, क्रीणीत। क्रीणानि, क्रीणाव, क्रीणाम।**

आत्मनेपदे रूपाणि च - **क्रीणीताम्, क्रीणाताम्, क्रीणताम्। क्रीणीष्व, क्रीणाथाम्, क्रीणीध्वम्। क्रीणै, क्रीणावहै, क्रीणामहै।**

लङि परस्मैपदे रूपाणि - **अक्रीणात्, अक्रीणीताम्, अक्रीणन्। अक्रीणाः, अक्रीणीतम्, अक्रीणीत। अक्रीणाम्, अक्रीणीव, अक्रीणीम।**

आत्मनेपदे रूपाणि च - **अक्रीणीत, अक्रीणाताम्, अक्रीणत। अक्रीणीथाः, अक्रीणाथाम्, अक्रीणीध्वम्। अक्रीणि, अक्रीणीवहि, अक्रीणीमहि।**

विधिलिङि यासुटः ङित्त्वात् सर्वत्रैव ईत्त्वं भवति।

तथा च परस्मैपदे रूपाणि - **क्रीणीयात्, क्रीणीयाताम्, क्रीणीयुः। क्रीणीयाः, क्रीणीयातम्, क्रीणीयात। क्रीणीयाम्, क्रीणीयाव, क्रीणीयाम।**

आत्मनेपदस्थले तु सर्वत्रैव अजादिः ङित्प्रत्ययः परो भवति। अतः आकारलोपो भवति।

तथा च आत्मनेपदे रूपाणि – **क्रीणीत, क्रीणीयाताम्, क्रीणीरन्। क्रीणीथाः, क्रीणीयाथाम्, क्रीणीध्वम्। क्रीणीय, क्रीणीवहि, क्रीणीमहि।**

आशीर्लिङि परस्मैपदे रूपाणि - **क्रीयात्, क्रीयास्ताम्, क्रीयासुः। क्रीयाः, क्रीयास्तम्, क्रीयास्त। क्रीयासम्, क्रीयास्व, क्रीयास्म।**

आत्मनेपदरूपाणि च – **क्रेषीष्ट, क्रेषीयास्ताम्, क्रेषीरन्। क्रेषीष्ठाः, क्रेषीयास्थाम्, क्रेषीढ्वम्। क्रेषीय, क्रेषीवहि, क्रेषीमहि।**

लुङि अटि प्रथमपुरुषैकवचने तिपि इकारलोपे श्नाप्रत्ययापवादे च्लौ सिचि अपृक्तहलः तकारस्य ईडागमे अ क्री स् ईत् इति जाते सिचि वृद्धिः परस्मैपदेषु इत्यनेन क्री इत्यस्य ईकारस्य वृद्धौ ऐकारे सकारस्य षत्वे **अक्रैषीत्** इति रूपं सिध्यति। एवम् अग्रेऽपि विद्यार्थिना स्वयम् ऊह्यम्। अत्र लुङि सिचः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन।

तथा हि परस्मैपदे रूपाणि - **अक्रैषीत्, अक्रैष्टाम्, अक्रैषुः। अक्रैषीः, अक्रैष्टम्, अक्रैष्ट। अक्रैषम्, अक्रैष्व, अक्रैष्म।**

सार्वधातुकार्धधातुकयोः इति आर्धधातुकलक्षणगुणे आत्मनेपदे रूपाणि - **अक्रेष्ट, अक्रेषाताम्, अक्रेषत। अक्रेष्ठाः, अक्रेषाथाम्, अक्रेढ्वम्। अक्रेषि, अक्रेष्वहि, अक्रेष्महि।**

लृङि तिपि इकारलोपे श्नाप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन। पुनः स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारे सस्य षत्वे **अक्रेष्यत्** इति रूपम्। त-प्रत्यये पूर्ववत् प्रक्रियया **अक्रेष्यत** इति रूपम् सिध्यति।

तथा च परस्मैपदे रूपाणि - **अक्रेष्यत्, अक्रेष्यताम्, अक्रेष्यन्। अक्रेष्यः, अक्रेष्यतम्, अक्रेष्यत। अक्रेष्यम्, अक्रेष्याव, अक्रेष्याम।**

आत्मनेपदे रूपाणि च - **अक्रेष्यत, अक्रेष्येताम्, अक्रेष्यन्त। अक्रेष्यथाः, अक्रेष्येथाम्, अक्रेष्यध्वम्। अक्रेष्ये, अक्रेष्यावहि, अक्रेष्यामहि।**

।।इति क्र्यादिगणः।।

पाठगतप्रश्नाः-२

११. क्रीधातोः कः विकरणप्रत्ययो भवति।

१२. श्नाविकरणविधायकसूत्रं लिखत।

१३. क्रीधातोः लिटि मध्यमपुरुषैकवचने परस्मैपदे किम् रूपम्।

१४. लिटि आत्मनेपदस्थले मध्यमपुरुषबहुवचने किं रूपं भवति।

१५. क्रीणन्ति इत्यत्र आकारलोपः केन।

१६. क्रीधातोः कोऽर्थः।

१७. क्रीधातुः उभयपदी अस्ति न वा।

अथ चुरादिगणः

अत्र अवधेयम् - दशसु धातुगणेषु चुरादिगणः अन्तिमः। अन्यस्मात् गणाद् अयं विलक्षणोऽपि। णिच् द्विविधो भवति -१. स्वार्थिकः, २. हेतुमान् च इति। धातोः लकारविधानात् पूर्वं यदा स्वार्थे णिच् भवति तदा तस्य ण्यन्तस्य सनाद्यन्ता धातव इत्यनेन धातुसंज्ञायां लकारः, शप् इत्यादि भवति। प्रकृतेरेव अर्थं परिपोषयति इति हेतोः अयं णिच् स्वार्थिक इत्युच्यते - अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति

परिभाषाबलात्। यदा च हेत्वर्थे णिच् भवति तदा स हेतुमाण्णिच् इत्युच्यते। तत्रापि ण्यन्तस्य सनाद्यन्ता धातव इत्यनेन धातुसंज्ञा भवति। अयं विषयः अग्रे णिजन्तप्रकरणे ज्ञास्यते।

चुर स्तेये इति धातोः स्वार्थे णिच्-विधानाय सूत्रमिदमारभ्यते -

[२३.११] सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्॥ (३.१.२५)

सूत्रार्थः - सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। सत्यापपाश-रूपवीणा-तूलश्लोक-सेनालोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यः (५/३), णिच् (१/१) इति सूत्रगतपदच्छेदः। चुर् आदिः येषां ते चुरादयः इति बहुव्रीहिसमासः। सत्यापश्च पाशश्च रूपश्च वीणा च तूलञ्च श्लोकश्च सेना च लोम च त्वचश्च वर्म च वर्णञ्च चूर्णञ्च चुरादयश्च तेषामितरेतरयोगद्वन्द्वे सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादयः, तेभ्यः सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यः इति बहुव्रीहिगर्भो द्वन्द्वसमासः। प्रत्ययः (१/१), परः (१/१) इत्युभयमधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इत्यतः धातोः (५/१) इत्यनुवर्तते। एवञ्च सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्णादिनामधातुभ्यः तथा चुरादिगणपठितधातुभ्यः स्वार्थे णिच्-प्रत्ययः परो भवति इति सूत्रार्थः। णिचः णकारस्य चुटू इत्यनेन इत्संज्ञा। चकारस्य तु हलन्त्यम् इत्यनेन। तेन इ-मात्रम् शिष्यते।

उदाहरणे सूत्रार्थसमन्वयः- चुर्-धातोः लट्-विधानात् पूर्वमेव प्रकृतसूत्रेण स्वार्थे णिचि अनुबन्धलोपे चुर् इ इति जाते णिचः तिङ्शिद्भिन्नत्वात् आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे ओकारे चोरि इति जायते। ततः अस्य समुदायस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञायां कर्तृत्वविवक्षायां लटि लस्य स्थाने आत्मनेपदप्रत्ययपरस्मैपदप्रत्यययोः मध्ये कतरत् स्यात्। तदा उच्यते - शेषात् कर्तरि परस्मैपदम् इति सूत्रेण परस्मैपदप्रत्ययः एव स्यात्। किन्तु लोके कर्त्रभिप्राये क्रियाफले आत्मनेपदस्यापि प्रयोगो दृश्यते। अतः तस्यापि सिद्ध्यर्थम् अग्रिमसूत्रमारभ्यते -

[२३.१२] णिचश्च॥ (१.३.७४)

सूत्रार्थः - णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। णिचः (५/१), च (अव्ययम्) इति सूत्रगतपदच्छेदः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् (१/१) इत्यस्यानुवृत्तिर्भवति। स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यतः कर्त्रभिप्राये (७/१), क्रियाफले (७/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। णिच् इति एकः प्रत्ययः, तेन प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया तदन्तविधौ

णिजन्तात् इत्यर्थलाभः। णिजन्तात् धातोः आत्मनेपदं भवति कर्तृगामिनि क्रियाफले इति सूत्रार्थः। एवञ्च चुरादिधातुभ्यः कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, क्रियाफलस्य परगामित्वे तु परस्मैपदम्। सूत्रस्य अस्य बोधसौकर्याय स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यस्य व्याख्यानम् द्रष्टुम् शक्यम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण चोरि ल् इति जाते क्रियाफलस्य कर्तृगामित्वविवक्षायाम् प्रकृतसूत्रेण लस्य स्थाने आत्मनेपदप्रत्ययस्य विधानम् क्रियते। ततः प्रथमपुरुषैकवचनविवक्षायाम् तप्रत्यये चोरि त इति जाते तप्रत्ययस्य सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि शपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन णिचः इकारस्य गुणे एकारे अयादेशे टेः एत्वे वर्णसम्मेलने च **चोरयते** इति रूपं सिध्यति।

क्रियाफलस्य परगामित्वे शेषात्कर्तरि परस्मैपदम् इत्यनेन लस्य स्थाने परस्मैपदप्रत्ययो भवति। ततः प्रथमपुरुषैकवचने तिपि चोरि ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि शपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन णिचः इकारस्य गुणे एकारे अयादेशे वर्णसम्मेलने च **चोरयति** इति रूपं सिध्यति।

चुर्-धातोः आर्धधातुके लिटि विवक्षिते आदौ स्वार्थे सत्यापादिसूत्रेण णिचि चुर् इ इति जाते णिचः इकारस्य आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां पुगन्तलघूपधस्य च इत्यनेन चुरः उपधाभूतस्य उकारस्य गुणे स्थानत आन्तर्यात् ओकारे चोरि इति जायते। तस्य च समुदायस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञा भवति। ततः भूतानद्यतनपरोक्षार्थवृत्तित्वविवक्षायाम् लिट्लकारे विहिते चोरि ल् इति स्थिते चोरि-धातोः अनेकाच्त्वात् कास्यनेकाच आम् वक्तव्यो लिटि इति वार्तिकेन आम्-प्रत्यये चोरि आम् ल् इति जाते अयामन्ताल्वाय्येत्न्विष्णुषु इत्यनेन चोरि इत्यस्य णेः इकारस्य अयादेशे चोर् अय् आम् ल् इति जायते। ततः आमः इति सूत्रेण आमः परस्य लिटः लुकि धात्वधिकारे विहितत्वात् तिङ्शिद्भिन्नत्वाच्च कृदतिङ् इति सूत्रेण लिटः कृत्संज्ञायां चोरयाम् इत्यस्य प्रत्ययलक्षणेन कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां ङ्याप्प्रातिपदिकात् इति सूत्रेण सु-प्रत्यये चोरयाम् सु इति स्थिते आमः इति सूत्रेण सुलुकि चोरयाम् इत्यस्य सुबन्तत्वात् सुप्तिङन्तं पदं इति पदसंज्ञा भवति। ततः चोरयाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण लिट्परकस्य कृञः अनुप्रयोगे चोरयाम् कृ लिट् इति जाते अनुबन्धलोपे चोरयाम् कृ ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण लस्य स्थाने तिपि अनुबन्धलोपे चोरयाम् कृ ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपो सर्वादेशे णलि अनुबन्धलोपे चोरयाम् कृ अ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः कृ इत्यस्य द्वित्वे चोरयाम् कृ कृ अ इति जाते द्विरुक्तस्य पूर्वभागस्य कृ इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च चोरयाम् कर् कृ अ इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे चोरयाम् क कृ अ इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे चोरयाम् च कृ अ इति जाते णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य कृञः ऋकारस्य वृद्धौ आकारे उरण् रपरः इति

रपरत्वे च चोरयाम् च कार् अ इति जाते चोरयाम् इति मान्तस्य पदस्य हल्परत्वात् मोऽनुस्वारः इति मस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **चोरयाञ्चकार** इति रूपं सिध्यति। परसवर्णाभावे **चोरयांचकार** इति रूपम् भवति।

{सूत्रम्- **अयामन्ताल्वाय्येत्न्विष्णुषु** (६.४.५५) = आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात्।}

आम्प्रत्ययस्य प्रकृतिः ण्यन्तः चोरिधातुः उभयपदी अस्ति इति हेतोः लिटि अनुप्रयुज्यमानः कृधातुरपि उभयपदी भवति। तस्मात् आत्मनेपदमपि भवति। अतः प्रथमपुरुषैकवचने तप्रत्यये **चोरयाञ्चक्रे** इति रूपम् सिध्यति। प्रक्रिया - पूर्ववत् प्रक्रियया चोरयाम् कृ लिट् इति जाते अनुबन्धलोपे चोरयाम् कृ ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये चोरयाम् कृ त इति स्थिते लिटस्तझयोरेशिरेच् इति लिडादेशस्य त इत्यस्य स्थाने एश् इति सर्वादेशे अनुबन्धलोपे चोरयाम् कृ ए इति जाते सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य ऋकारस्य गुणे प्राप्ते असंयोगाल्लिट् कित् इति सूत्रेण लिडादेशस्य त-प्रत्ययस्य कित्त्वे क्ङिति च इति गुणनिषेधे लिटि धातोरनभ्यासस्य इति अस्मात् परत्वात् इको यणचि इति यणि प्राप्ते द्विर्वचनेऽचि इति द्वित्वार्थम् अचः यणादेशनिषेधे लिटि धातोरनभ्यासस्य इति सूत्रेण धातोर्द्वित्वे चोरयाम् कृ कृ ए इति जाते पूर्वोऽभ्यासः इति सूत्रेण द्विरुक्तस्य पूर्वभागस्य अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च चोरयाम् कर् कृ ए इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे चोरयाम् क कृ ए इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च चोरयाम् कृ ए इति जाते इको यणचि इति सूत्रेण ऋकारस्य यणि रेफे चोरयाम् च क्र् ए इति जाते चोरयाम् इति मान्तस्य पदस्य हल्परत्वात् मोऽनुस्वारः इति मस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **चोरयाञ्चक्रे** इति रूपं सिध्यति। परसवर्णाभावे **चोरयांचक्रे** इति रूपम् भवति। भूधातोः अस्धातोश्च अनुप्रयोगे तु तयोः परस्मैपदित्वात् न आत्मनेपदसम्भवः।

चुरादिगणीयेभ्यः सर्वेभ्यः धातुभ्यः णिच् भवति इति हेतोः ते णिजन्तधातवः अनेकाचो भवन्ति। ततः कास्यनेकाच आम्वक्तव्यो लिटि इति वार्तिकेन सर्वेभ्यः चुरादिगणीयधातुभ्यः लिटि आम्प्रत्ययो भवति किञ्च कृ-भू-अस् इत्येतेषाम् अनुप्रयोगो भवति।

एवञ्च लिटि रूपाणि (**कृ**-धातोः अनुप्रयोगे)

चोरयाञ्चकार, चोरयाञ्चक्रतुः, चोरयाञ्चक्रुः, चोरयाञ्चकर्थ, चोरयाञ्चक्रथुः, चोरयाञ्चक्र। चोरयाञ्चकार/चोरयाञ्चकर, चोरयाञ्चकृव, चोरयाञ्चकृम।

चोरयांचकार, चोरयांचक्रतुः, चोरयांचक्रुः, चोरयांचकर्थ, चोरयांचक्रथुः, चोरयांचक्र। चोरयांचकार/चोरयांचकर, चोरयांचकृव, चोरयांचकृम।

चोरयाञ्चक्रे, चोरयाञ्चक्राते, चोरयाञ्चक्रिरे। चोरयाञ्चकृषे, चोरयाञ्चक्राथे, चोरयाञ्चकृढ्वे। चोरयाञ्चक्रे, चोरयाञ्चकृवहे, चोरयाञ्चकृमहे।

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

चोरयांचक्रे, चोरयांचक्राते, चोरयांचक्रिरे। चोरयांचकृषे, चोरयांचक्राथे, चोरयांचकृढ्वे। चोरयांचक्रे, चोरयांचकृवहे, चोरयांचकृमहे।

भू-धातोः अनुप्रयोगे - **चोरयाम्बभूव, चोरयाम्बभूवतुः, चोरयाम्बभूवुः। चोरयाम्बभूविथ, चोरयाम्बभूवथुः, चोरयाम्बभूव। चोरयाम्बभूव, चोरयाम्बभूविव, चोरयाम्बभूविम।**

चोरयांबभूव, चोरयांबभूवतुः, चोरयांबभूवुः। चोरयांबभूविथ, चोरयांबभूवथुः, चोरयांबभूव। चोरयांबभूव, चोरयांबभूविव, चोरयांबभूविम।

अस्-धातोः अनुप्रयोगे - **चोरयामास, चोरयामासतुः, चोरयामासुः।चोरयामासिथ, चोरयामासथुः, चोरयामास। चोरयामास, चोरयामासिव, चोरयामासिम।** एतेषां प्रक्रियाज्ञानाय लिटि एध्धातुरूपाणि द्रष्टव्यानि।

चुरादिगणीयधातुभ्यः णिच्प्रत्यये विहिते सति निष्पन्नानां णिजन्तानाम् अनेकाच्त्वात् ते सेटो भवन्ति। तस्मात् **लुटि** तासः इडागमः सुलभः। यथा - तिपि शप्-प्रत्ययापवादे तासि इडागमे णिचः इकारस्य गुणे अयादेशे डादेशे टिलोपे चोरयिता इति रूपं भवति। अग्रे रूपाणि स्वयं साधनीयानि।

तथा च **लुटि** परस्मैपदे रूपाणि - **चोरयिता, चोरयितारौ, चोरयितारः। चोरयितासि, चोरयितास्थः, चोरयितास्थ। चोरयितास्मि, चोरयितास्वः, चोरयितास्मः।**

तथा च आत्मनेपदे रूपाणि - **चोरयिता, चोरयितारौ, चोरयितारः। चोरयितासे, चोरयितासाथे, चोरयिताध्वे। चोरयिताहे, चोरयितास्वहे, चोरयितास्महे।**

इतः परं लृटि लोटि लङि विधिलिङि च रूपाणि स्वयं साधयत। अधः केवलं रूपाणि प्रदीयन्ते।

लृटि परस्मैपदे रूपाणि - **चोरयिष्यति, चोरयिष्यतः, चोरयिष्यन्ति। चोरयिष्यसि, चोरयिष्यथः, चोरयिष्यथ। चोरयिष्यामि, चोरयिष्यावः, चोरयिष्यामः।**

तथा च आत्मनेपदे रूपाणि - **चोरयिष्यते, चोरयिष्येते, चोरयिष्यन्ते। चोरयिष्यसे, चोरयिष्येथे, चोरयिष्यध्वे। चोरयिष्ये, चोरयिष्यावहे, चोरयिष्यामहे।**

लोटि परस्मैपदे रूपाणि - **चोरयतु-चोरयतात्, चोरयताम्, चोरयन्तु। चोरय-चोरयतात्, चोरयतम्, चोरयत। चोरयाणि, चोरयाव, चोरयाम।**

तथा च आत्मनेपदे रूपाणि - **चोरयताम्, चोरयेताम्, चोरयन्ताम्। चोरयस्व, चोरयेथाम्, चोरयध्वम्। चोरये, चोरयावहै, चोरयामहै।**

लङि परस्मैपदे रूपाणि - **अचोरयत्, अचोरयताम्, अचोरयन्। अचोरयः, अचोरयतम्, अचोरयत। अचोरयम्, अचोरयाव, अचोरयाम।**

तथा च आत्मनेपदे रूपाणि - **अचोरयत, अचोरयेताम्, अचोरयन्त। अचोरयथाः, अचोरयेथाम्, अचोरयध्वम्। अचोरये, अचोरयावहि, अचोरयामहि।**

विधिलिङि परस्मैपदे रूपाणि - **चोरयेत्, चोरयेताम्, चोरयेयुः। चोरयेः, चोरयेतम्, चोरयेत। चोरयेय, चोरयेवहि, चोरयेमहि।**

तथा च आत्मनेपदे रूपाणि - **चोरयेत, चोरयेयाताम्, चोरयेरन्। चोरयेथाः, चोरयेयाथाम्, चोरयेध्वम्। चोरये, चोरयेवहि, चोरयेमहि।**

आशीर्लिङि तिपि चोरि यास् स् त् इति जाते यास् स् त् इति समुदायस्य आर्धधातुकत्वं तु अस्ति परन्तु वलादित्वं नास्ति। अतः नेट्। णेः इकारस्य णेरनिटि इत्यनेन लोपे चोर् यास् त् इति जाते सकारद्वयलोपे **चोर्यात्** इति रूपं सिध्यति। एवमेव अग्रे ऊह्यम्। तथा च आशीर्लिङि परस्मैपदस्थले इडागमो न भवति किन्तु आत्मनेपदस्थले भवति इत्यवधेयम्।

तथा च परस्मैपदे रूपाणि - **चोर्यात्, चोर्यास्ताम्, चोर्यासुः। चोर्याः, चोर्यास्तम्, चोर्यास्त। चोर्यासम्, चोर्यास्व, चोर्यास्म।**

तथा च आत्मनेपदे रूपाणि - **चोरयिषीष्ट, चोरयिषीयास्ताम्, चोरयिषीरन्। चोरयिषीष्ठाः, चोरयिषीयास्थाम्, चोरयिषीढ्वम्-चोरयिषीध्वम्। चोरयिषीय, चोरयिषीवहि, चोरयिषीमहि।**

चुर्-धातोः पूर्ववत् प्रक्रियया चोरि इति जाते **लुङि** अडागमे तिपि इकारलोपे अ चोरि त् इति जाते शप्-प्रत्ययापवादे च्लौ च्लेः स्थाने सिजादेशे प्राप्ते तं बाधित्वा **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इत्यनेन च्लेः स्थाने चङ्-आदेशे अनुबन्धलोपे अ चोरि अ त् इति जाते **णेरनिटि** इत्यनेन णेः इकारस्य लोपे अ चोर् अ त् इति जाते **णौ चङ्युपधाया ह्रस्वः** इत्यनेन चोर् इत्यस्य उपधाभूतस्य ओकारस्य ह्रस्वे उकारे अ चुर् अ त् इति जायते। ततः **चङि** इत्यनेन चुर् इत्यस्य द्वित्वे अ चुर् चुर् अ त् इति जाते द्विरुक्तस्य पूर्वभागस्य पूर्वोऽभ्यासः इत्यनेन अभ्याससंज्ञायाम् हलादिः शेषः इत्यनेन अभ्यासस्य आदेः हलः शेषे अ चु चुर् अ त् इति जाते प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन णिः लभ्यते। तेन चङ्परे णौ अचुचुर् इति अङ्गम् लभ्यते। तस्य च अङ्गस्य चु इति अभ्याससंज्ञकः लघुपरश्च वर्तते। अतः **सन्वल्लघुनि चङ्परेऽनग्लोपे** इत्यनेन चोः सन्वद्भावे अभ्यासस्य चोः उकारस्य **दीर्घो लघोः** इत्यनेन दीर्घे ऊकारे वर्णसम्मेलने अचूचुरत् इति रूपम् सिध्यति। आत्मनेपदस्थले तु तप्रत्यये अचूचुरत इति रूपम् सिद्ध्यति। एवम् अन्यत्र बोद्धव्यम्।

{सूत्रम्- **णिश्रिदुस्रुभ्यः कर्तरि चङ्** (३.१.४८) = ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात् कर्त्रर्थे लुङि परे।}

{सूत्रम्. **णेरनिटि** (६.४.५१) = अनिडादावार्धधातुके परे णेर्लोपःस्यात्।}

{सूत्रम्. **णौ चङ्युपधाया ह्रस्वः** (७.४.१) = चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात्।}

{सूत्रम्. **चङि** (६.१.११) = चङि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वेस्तोऽजादेस्तु द्वितीयस्य।}

{सूत्रम्. **सन्वल्लघुनि चङ्परेऽनग्लोपे** (७.४.९३) = चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरः तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति।}

{सूत्रम्. **दीर्घो लघोः** (७.४.९४) = लघोरभ्यासस्य दीर्घः स्यात् सन्वद्भावविषये।}

तथा हि परस्मैपदे रूपाणि - **अचूचुरत्, अचूचुरताम्, अचूचुरन्। अचूचुरः, अचूचुरतम्, अचूचुरत। अचूचुरम्, अचूचुराव, अचूचुराम।**

तथा च आत्मनेपदे रूपाणि - **अचूचुरत, अचूचुरेताम्, अचूचुरन्त। अचूचुरथाः, अचूचुरेथाम्, अचूचुरध्वम्। अचूचुरे, अचूचुरावहि, अचूचुरामहि।**

तथा हि परस्मैपदे रूपाणि - **अचोरयिष्यत्, अचोरयिष्यताम्, अचोरयिष्यन्। अचोरयिष्यः, अचोरयिष्यतम्, अचोरयिष्यत। अचोरयिष्यम्, अचोरयिष्याव, अचोरयिष्याम।**

तथा हि आत्मनेपदे रूपाणि - **अचोरयिष्यत, अचोरयिष्येताम्, अचोरयिष्यन्त। अचोरयिष्यथाः, अचोरयिष्येथाम्, अचोरयिष्यध्वम्। अचोरयिष्ये, अचोरयिष्यावहि, अचोरयिष्यामहि।**

॥इति चुरादिगणः॥

पाठगतप्रश्नाः-३

१८. चुर्-धातोः यः णिच्प्रत्ययो भवति स स्वार्थिकः हेतुमान् वा।
१९. चुरादिधातुभ्यः स्वार्थे णिच्प्रत्ययविधायकसूत्रं लिखत।
२०. चोरयति-चोरयते इत्यत्र उभयपदविधानं केन सूत्रेण।
२१. चुर्-धातोः लिटि प्रथमपुरुषैकवचने कति रूपाणि
२२. सत्यापादिसूत्रं पूरयत।
२३. चोरयति इत्यत्र कः विकरणप्रत्ययः।

पाठसारः

अस्मिन् पाठे तनादिगणः, क्र्यादिदिगणः, चुरादिगणः चेति इति गणत्रयस्य आलोचना विद्यते। तत्रादौ तनादिगणीयस्य तन्-धातोः कृधातोः च आलोचनं विहितम्। तत्र तन्-धातोर्विषये तनादिकृञ्भ्य उः, तनादिभ्यस्तथासोः, अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति, कृधातोः विषये अत उत्सार्वधातुके, न भकुर्छुराम्, नित्यं करोतेः, ये च इत्येतानि सूत्राणि व्याख्यातानि। ततः क्र्यादिगणीयस्य क्रीधातोः विषये आलोचनं कृतम्। तत्र क्री-धातोः विषये क्र्यादिभ्यः श्ना इति श्नाविकरणविधायकम् सूत्रम् आलोचितम्। ततः ई हल्यघोः, श्नाभ्यस्तयोरातः इति सूत्रे व्याख्याते। तदनन्तरम् चुर्-धातुः आलोचितः। तत्र चुर्-धातोः कथं णिच्प्रत्ययो भवति, कश्च विकणप्रत्ययो भवति इत्यादि आलोचितम्। किञ्च लुङि सन्वद्भावो भवति इति विशेषोऽपि प्रक्रियासहयोगेन प्रदर्शितः। पाठेऽस्मिन् न समेषां रूपाणां ससूत्रं प्रक्रियाः प्रदर्शिताः, ताः स्वयं साध्याः।

भ्वादितः चुरादिगणं यावत् दश गणाः सन्ति। अतः अस्य समग्रस्य प्रकरणस्य नाम यथा तिङन्तं प्रकरणं तथैव दशगणी इत्यपि व्याकरणतन्त्रे केचित् व्यवहरन्ति।

पाठान्तप्रश्नाः

१. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् इति सूत्रं सोदाहरणं व्याखात।

२. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति इति सूत्रं सोदाहरणं व्याखात।

३. तनादिभ्यस्तथासोः इति सूत्रं सोदाहरणं व्याखात।

४. तन्-धातोः लटि परस्मैपदे आत्मनेपदे च सविकल्पं रूपाणि लेख्यानि।

५. कृ-धातोः लटि परस्मैपदे आत्मनेपदे च सविकल्पं रूपाणि लेख्यानि।

६. क्री-धातोः लटि परस्मैपदे आत्मनेपदे च रूपाणि लेख्यानि।

७. चुर्-धातोः लटि परस्मैपदे आत्मनेपदे च रूपाणि लेख्यानि।

८. चुर्-धातोः लिटि कृञः अनुप्रयोगे निष्पन्नानि सविकल्पं सर्वाणि रूपाणि लिखत।

९. चुर्-धातोः लिटि भूधातोः अनुप्रयोगे निष्पन्नानि सर्वाणि रूपाणि लिखत।

१०. अचूचुरत् इत्यस्य प्रक्रिया लेख्या।

११. अक्रैषीत् इत्यस्य प्रक्रिया लेख्या।

१२. अकृत इत्यस्य प्रक्रिया लेख्या।

१३. चक्रे चकार इत्यनयोः प्रक्रिया लेख्या।

१४. कुरुतः इत्यस्य प्रक्रिया लेख्या।

१५. चोरयति चोरयते इत्यनयोः प्रक्रिया लेख्या।

१६. चोरयाञ्चकार इत्यस्य प्रक्रिया लेख्या।

१७. चोरयाञ्चक्रे इत्यस्य प्रक्रिया लेख्या।

१८. क्रीधातोः लिटि परस्मैपदे आत्मनेपदे च रूपाणि लिखत।

१९. कृधातोः लिटि परस्मैपदे आत्मनेपदे च रूपाणि लिखत।

२०. अतानीत् अतनीत् इत्यनयोः प्रक्रिया लेख्या।

२१. अतत अतनिष्ट इत्यनयोः प्रक्रिया लेख्या।

२२. चिक्राय इत्यस्य प्रक्रिया लेख्या।

२३. कुर्वन्ति इत्यस्य प्रक्रिया लेख्या।

२४. नित्यं करोतेः इति सूत्रस्य ससन्दर्भं व्याख्या कार्या।

२५. ये च इति सूत्रस्य व्याख्या कार्या।

२६. ई हल्यघोः इति सूत्रस्य व्याख्या कार्या।

२७. श्नाभ्यस्तयोरातः इति सूत्रस्य व्याख्या कार्या।

२८. अत उत्सार्वधातुके इति सूत्रस्य व्याख्या कार्या।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. उ-प्रत्ययः।

२. उ-प्रत्ययः।

३. तनादेः सिचो वा लुक्स्यात्तथासोः।

४. कृञ उलोपो यादौ प्रत्यये परे।

५. करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः।

६. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।

७. तन्वहे, तनुवहे।

८. क्रियात्।

९. ऋद्धनोः स्ये।

१०. अतत, अतनिष्ट इति रूपद्वयम्।

उत्तराणि- २

११. श्ना।

१२. क्र्यादिभ्यः श्ना।

१३. चिक्रयिथ-चिक्रेथ।

१४. चिक्रियिध्वे-चिक्रियिढ्वे।

१५. श्नाभ्यस्तयोरातः।

१६. द्रव्यविनिमयः।

१७. उभयपदी अस्ति।

उत्तराणि- ३

१८. स्वार्थिकः

१९. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्।

२०. णिचश्च।

२१. चोरयाञ्चकार, चोरयाम्बभूव, चोरयामास इति रूपत्रयम्।

२२. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्।

२३. शप्।

॥इति त्रयोविंशः पाठः ॥